http://www.sgbauonline.com/



**M.A. (Part—II) Sanskrit (Semester—III) Examination**

**SANSKRIT**

**(Natyashastra & Natak)**

**Paper—II**

Time : Three Hours] [Maximum Marks : 80

**सूचना** :—निर्देशाभावे उत्तराणि स्वीकृतभाषया एव लिखत।

1. (अ) द्वयो कारिकयो: सविवरणमनुवादं कुरुत : 10

(1) मुखप्रतिमुखे गर्भ: सावमर्शोपसंहृति:।
गुखबीजसमुत्पत्तिर्नानार्थरससम्भवा।।

(2) बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणा:।
अर्थप्रकृतय: पञ्च ता एता: परिकीर्तिता:।।

(3) दशरूपानुकारेण यस्य माद्यन्ति भावका:।
नम: सर्वविदे तस्मै विष्णवे भरताय च।।

(4) तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजित:।
प्रवेशोऽङ्कद्वयस्यान्त: शेषार्थस्योपसूचक:।।

(ब) द्वयो: विषययो: उपरि टिप्पणीं लिखत :— 6

(1) नाट्यधर्मस्य अपेक्षया कथावस्तुभेदा:।

(2) निर्वहणसन्धे: कानिचन षडाङ्गानि।

(3) प्रासङ्गिककथावस्तु:।

(4) नृत्यं नृत्तं च।

2. (अ) द्वयो: कारिकयो: सविवरणमनुवादं कुरुत :— 10

(1) महासत्त्वोऽतिगम्भीर: क्षमावानविकत्थन:।
स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रत:।।

(2) चिन्तानि:श्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणै:।
युक्ता: षडन्त्या द्वे चाद्ये क्रीडौज्ज्वल्यप्रहर्षितै:।।

(3) विशोका सात्त्वती सत्त्वशौर्यत्यागदयार्जवै:।
संलापोत्थापकावस्यां साङ्घात्य: परिवर्तक:।।

(4) शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुन:।
रसे रौद्रे च बीभत्से वृत्ति: सर्वत्र भारती।।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(ब) टिप्पणीद्वयम् लिखत :— 6

(1) स्वभावजाः भावाः।

(2) नायिकायाः सहायिन्यः।

(3) नायकस्य सात्त्विकाः गुणाः।

(4) रूपके मन्त्रणम्।

3. (अ) **एकस्य** प्रश्नस्य उत्तरं लिखत :— 10

(1) प्रहसनडिमयोः स्वरूपं स्पष्टीकुरुत।

(2) भारतीवृत्तेः अङ्गानि लिखत।

(ब) कामपि **एकां** टिप्पणीं लिखत :— 6

(1) ईहामृग।

(2) प्रकरणलक्षणम्।

4. (अ) व्यभिचारिणः भावाः स्पष्टीकुरुत। 10

अथवा

स्थायीभावस्य रसाधारभूतत्वं विशदीकुरुत।

(ब) **एकां** टिप्पणीं लिखत :— 6

(1) बीभत्सरसः।

(2) भयानकरसः।

5. सुयोग्यम् उत्तरं विचिनुत (केऽपि षोडश) :— 16

(1) दशरूपकं केन विरचितम् ?

(अ) भरतमुनिना (ब) धनिकेन

(क) धनञ्जयेन (ड) उद्भटेन

(2) भावाश्रयम् किम् :

(अ) नाट्यम् (ब) नृत्यम्

(क) रूपम् (ड) न किमपि

(3) प्रासङ्गिककथावस्तुनः कतिविधत्वम् ?

(अ) पञ्चविधत्वम् (ब) चतुर्विधत्वम्

(क) त्रिविधत्वम् (ड) द्विविधत्वम्

(4) स्वल्पोद्दिष्टस्तु तद्धेतुः ________।

(अ) बीजम् (ब) बिन्दुः

(क) कार्यम् (ड) यत्नम्



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(5) मुखसन्ध्यङ्गं वर्तते ______ ।

(अ) परिभावना (ब) नर्मद्युति:

(क) पुष्पम् (ड) वज्रम्

(6) सन्ध्यङ्गानां प्रयोजनानि कति ?

(अ) त्रीणि (ब) चत्वारि

(क) पञ्च (ड) षट्

(7) त्रिपताकाकरेण किं दर्शितव्यम् ?

(अ) अपवारितम् (ब) जनान्तिकम्

(क) आकाशभाषितम् (ड) पताकास्थानकम्

(8) नायकभेदा: कति ?

(अ) द्वौ (ब) त्रय:

(क) चत्वार: (ड) पञ्च

(9) का नायिका क्रुधि मृदु: ?

(अ) स्वाधीनपतिका (ब) प्रोषितभर्तृका

(क) मुग्धा (ड) मध्या

(10) योषिदलङ्कारा: कति ?

(अ) विंशति: (ब) सप्त

(क) दश (ड) पञ्च

(11) अवस्थानुसारेण नायिका भेदसंख्या :

(अ) अष्टादश (ब) अष्ट

(क) दश (ड) विंशति:

(12) वीरे का वृत्ति: न अन्तर्भूता ?

(अ) कैशिकी (ब) सात्वती

(क) आरभटी (ड) भारती

(13) लिङ्गिनी का भाषा उपयोजयति रूपके ?

(अ) पैशाची (ब) मागधी

(क) शौरसेनी (ड) संस्कृत

(14) भारतीवृत्ति: कुत्र स्पष्टीकृता ?

(अ) नाटकलक्षणे (ब) प्रकरणलक्षणे

(क) नाटिकालक्षणे (ड) सन्धिप्रकरणे



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(15) कान्तेः विस्तारः ______ ।

(अ) प्राप्तिः (ब) माधुर्यम्

(क) दीप्तिः (ड) वृत्तिः ।

(16) वीथ्यङ्गानि कति ।

(अ) एकादश (ब) द्वादश

(क) त्रयोदश (ड) चतुर्दश

(17) नाटके प्रधानरसः वर्तते ______ ।

(अ) बीभत्सः (ब) शृङ्गारः

(क) हास्यरसः (ड) रौद्ररसः

(18) एकाहाचरितैकाङ्को बहुभिनरैः क्रियते ______ ।

(अ) ईहामृगः (ब) व्यायोगः

(क) नाटकम् (ड) प्रकरणम्

(19) वीररसस्य स्थायीभावो ______ विद्यते ।

(अ) रतिः (ब) उत्साहः

(क) भयम् (ड) क्रोधः

(20) क्षोभः कस्मिन् रसे वर्तते ?

(अ) शृङ्गारे (ब) हास्ये

(क) करुणे (ड) रौद्रे



http://www.sgbauonline.com/